ORIENTAL INSTITUTE, BARODA.

Acc. No. 21812.　　Subject पुराण. गीता.

Name भगवद्गीता. (stray leaves)

Author

Age　　Extent No. 47, 48, 49 & 51. (4). granth 35

Language Sanskrit.　　Script Devanāgarī.

Source - Shri Someshwar Pathak. Padra. Gift.

गतिं ॥३२॥ किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा ॥
अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां ॥३३॥ मन्मना
भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि युक्त्वै
वमात्मानं मत्परायणः ॥३४॥ ॥इति महाभारते भीष्म
पर्वणि ॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराज
गुह्ययोगो नाम नवमोध्यायः ॥९॥ ॥श्रीभगवानु
वाच ॥ ॥भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्ते

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)

हंप्रियमाणायवक्ष्यामिहितकाम्यया॥१॥नमेविदुः
सुरगणाःप्रभवंनमहर्षयः॥अहमादिर्हिदेवानाम
हर्षीणांचसर्वशः॥२॥योमामजमनादिंचवेत्तिलोक
महेश्वरं॥असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते॥३॥
बुद्धिर्ज्ञानमसंमूढःमोहःक्षमासत्यंदमःशमः॥सुखं ॥६७॥
दुःखंभवोभावोभयंचाभयमेवच॥४॥अहिंसासम
ताबुद्धिस्तुष्टिस्तपोदानंयशोयशः॥भवंतिभावाभू
तानांमत्तएवपृथग्विधाः॥५॥महर्षयःसप्तपूर्वेच

त्वारोमनवस्तथा ।। मद्भावामानसाजातायेषांलोक
ऽइमाःप्रजाः ।।६।। एतांविभूतिंयोगंचममयोवेत्तितत्त्व
तः ।। सोविकंपेनयोगेनयुज्यतेनात्रसंशयः ।।७।। अहं
सर्वस्यप्रभवोमत्तःसर्वंप्रवर्त्तते ।। इतिमत्वाभजंतेमां
बुधाभावसमन्विताः ।।८।। मच्चित्तामद्गतप्राणाबोध
यंतःपरस्परं ।। कथयंतश्चमांनित्यंतुष्यंतिचरमंतिच
।।९।। तेषांसततयुक्तानांभजतांप्रीतिपूर्वकं । ददामिबु
द्धियोगंतंयेनमामुपयांतिते ।।१०।। तेषामेवानुकंपार्थ

महमज्ञानजंतमः ॥ नाशयाम्यात्मभावस्थोज्ञानदी
पेनभास्वता ॥११॥ ॥ अर्ज्जुनउवाच ॥ ॥ परंब्रह्मपरंधा
मपवित्रंपरमंभवान् ॥ पुरुषंशाश्वतंदिव्यमादिदेव
मजंविभुं ॥१२॥ आहुस्त्वामृषयःसर्वेदेवर्षिर्नारदस्त
था ॥ असितोदेवलोव्यासः स्वयंचैवब्रवीषिमे ॥१३॥ ॥८॥
गीता सर्वमेतदृतंमन्येयन्मांवदसिकेशव ॥ नहितेभग वा
न्व्यक्तिंविदुर्देवानदानवाः ॥१४॥ स्वयमेवात्मनात्मा
नंवेत्थत्वंपुरुषोत्तम ॥ भूतभावनभूतेशदेवदेव

जगत्पते॥१५॥वक्तुमर्हस्यशेषेणदिव्याह्यात्मविभूतयः
॥याभिर्विभूतिभिर्लोकानिमांस्त्वंव्याप्यतिष्ठसि॥१६॥
कथंविद्यामहंयोगिंस्त्वांसदापरिचिंतयन्॥केषुके
षुचभावेषुचिंत्योसिभगवन्मया॥१७॥विस्तरेणात्मनो
योगंविभूतिंचजनार्दन॥भूयःकथयतृप्तिर्हिशृण्वतो
नास्तिमेमृतं॥१८॥श्रीभगवानुवाच॥हंततेकथयि
ष्यामिदिव्याह्यात्मविभूतयः॥प्राधान्यतःकुरुश्रेष्ठ
नास्त्यंतोविस्तरस्यमे॥१९॥अहमात्मागुडाकेशसर्व

भूताशयस्थितः॥ अहमादिश्चमध्यंचभूतानामंत
एवच॥२०॥आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमा
न॥मरीचिमरुतामस्मिनक्षत्राणामहंशशी॥२१॥वे
दानांसामवेदोस्मिदेवानामस्मिवासवः॥इंद्रियाणां
मनश्चास्मिभूतानामस्मिचेतना॥२२॥रुद्राणांशंक ॥५९॥
रश्चास्मिवित्तेशोयक्षरक्षसां॥वसूनांपावकश्चास्मि
मेरुःशिखरिणामहं॥२३॥पुरोधसांचमुख्यंमांवि
द्धिपार्थबृहस्पतिं॥सेनानीनामहंस्कंदःसरसामस्मि

हरश्चाहमुद्भवश्चभविष्यतां॥ कीर्त्तिःश्रीर्वाक्चनारीणां
स्मृतिर्मेधाधृतिःक्षमा॥३४॥बृहत्सामतथासाम्नांगाय
त्रीछंदसामहं॥ मासानांमार्गशीर्षोहमृतूनांकुसुमा
करः॥३५॥द्यूतंछलयतामस्मितेजस्तेजस्विनामहं॥
जयोस्मिव्यवसायोस्मिसत्वंसत्ववतामहं॥३६॥वृष्णी
नांवासुदेवोस्मिपांडवानांधनंजयः॥मुनीनामप्यहं
व्यासःकवीनामुशनाकविः॥३७॥दंडोदमयतामस्मि
नीतिरस्मिजिगीषतां॥ मौनंचैवास्मिगुह्यानांज्ञा

ॐ रवधिनां जयश्चास्मि धातु नाम स्मिकालश्च
सर्वे वांत एज्ञातिनां दन्नोहं पांडुनंदनः ३७

नंज्ञानवतामहं॥३८॥यच्चापिसर्वभूतानांबीजंतदहमर्जु
न॥नतदस्तिविनायत्स्यान्मयाभूतंचराचरं॥३९॥ना
तोस्तिममदिव्यानांविभूतीनांपरंतप॥एषतूद्देशतः
प्रोक्तोविभूतेर्विस्तरोमया॥४०॥यद्यद्विभूतिमत्सत्वंश्री
मदूर्जितमेववा॥तत्तदेवावगछत्वंममतेजोंशसंभवं॥४१॥
अथवाबहुनैतेनकिंज्ञातेनतवार्जुन॥विष्टभ्याहमिदंकृ
त्स्नमेकांशेनस्थितोजगत्॥४२॥इतिमहाभारतेभीष्म
पर्वणि॥ॐतत्सदितिश्रीमद्भगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रेश्रीकृष्णार्जुनसंवादेविभूतियोगोनामदशमोध्यायः॥अर्जुनउवाच॥

ORIENTAL INSTITUTE,
M. S. UNIVERSITY,
BARODA-(INDIA)